दृष्टिपरिणामत्रयावस्थाः दशा यस्य । यद्वा, त्रीन् तापान् दशति नाशयतीति । दन्श + मूलविभुजादित्वात् कः पृषोदरादित्वात् नलोपः । यद्वा, त्र्यधिकास्त्रिंशत्तत्त्वा दश परिमाणमस्य । समासे डच् । शाकपार्थिवादिवत् मध्यलोपः ।) देवः । इत्यमरः । १ । १ । ७ ॥ (यथा, महाभारते । ३।८५।१६ ।
"न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह ॥"
ते च अर्का द्वादश १२ रुद्रा एकादश ११ वसवोऽष्टौ ८ विश्वेदेवौ द्वौ २ समुदायेन त्रयस्त्रिंशत् ३३ ॥ त्रिंशत् परिमिते, त्रि । यथा, महाभारते । १ । ११३ । २१ ।
"ततः स कौरवो राजा विहृत्य
त्रिदशा निशाः ॥")

त्रिदशदीर्घिका, स्त्री, (त्रिदशानां देवानां दीर्घिका ।) स्वर्गङ्गा । इति हेमचन्द्रः । ४ । १४७ ॥

त्रिदशमञ्जरी, स्त्री, (त्रिदशप्रिया मञ्जरी यस्याः ।) तुलसी । इति राजनिर्घण्टः ॥ (तुलसीशब्देऽस्या गुणादयो व्याख्याताः ॥)

त्रिदशायुधं, क्ली, (त्रिदशानां देवानां आयुधम् ।) वज्रम् । इति त्रिकाण्डशेषः ॥

त्रिदशारिः, पुं, (त्रिदशानामरिः शत्रुः ।) असुरः । इति शब्दरत्नावली ॥

त्रिदशालयः, पुं, (त्रिदशानां देवानां आलयः ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, महाभारते । १ । ७६ । ६६ ।
"गुरोरुष्य सकाशे तु दशवर्षशतानि सः ।
अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम् ॥")
सुमेरुपर्व्वतः । इति हलायुधः ॥

त्रिदशावासः, पुं, (त्रिदशानां सुराणां आवासो वासस्थानम् ।) स्वर्गः । इति हलायुधः ॥

त्रिदशाहारः, पुं, (त्रिदशानां आहारः ।) अमृतम् । इति हलायुधः ॥

त्रिदशेश्वरी, स्त्री, (त्रिदशानामिन्द्रादिदेवानामीश्वरी ।) दुर्गा । यथा,—
"सुराङ्गास्त्रिदशा देवा नन्दिनी दुन्दुभिर्म्मता ।
तेषाञ्च वन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(गङ्गा । यथा, काशीखण्डे । २९ । ७२ ।
"तपस्वी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ॥")

त्रिदिनस्पृक्, [श्] पुं, (त्रिदिनं त्र्यहदिनत्रयं स्पृशतीति । स्पृश + क्विप् ।) त्र्यहस्पर्शः । यथा,
"तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनम् । त्रिदिनस्पृक् दिनत्रयसम्पर्शनाद्द्वः ।" इति ज्योतिषतत्त्वम् ॥

त्रिदिवः, पुं, (त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति । दिव + "हलश्च ।" ३ । ३ । १२१ । इति घञ् । संज्ञापूर्ब्बकत्वात् न गुणः । यद्वा, दीव्यन्तीति दिवाः । इगुपधेति कः । त्रयः सत्त्वरजस्तमोरूपाः दिवाः क्रीड़का विलासका इत्यर्थः यत्र । "तृतीया द्यौस्त्रिदिवः । घणर्थे कविधानं इतिविषये संख्याशब्दस्य पूरणार्थत्वं त्रिभागवत् ।" इति शिशुपालवधटीकायां मल्लिनाथः । १ । ३६ ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, मनुः । ९ । २५३ ।
"रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात् ।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥")
क्ली, आकाशः । इति हेमचन्द्रः ॥

त्रिदिवा, स्त्री, नदीभेदः । इति मेदिनी । वे, ३७ ॥ (यथा, मत्स्यपुराणे । ११३ । ३१ ।
"त्रिभामा ऋषिकुल्या च इक्षुदा त्रिदिवाचला ॥")

त्रिदिवेशः, पुं, (त्रिदिवस्य स्वर्गस्य ईशः ।) देवः । इत्यमरः । १ । १ । ७ ॥

त्रिदिवोद्भवा, स्त्री, (त्रिदिवादुद्भवो यस्याः ।) स्थूलैला । इति राजनिर्घण्टः ॥ (गङ्गा । स्वर्गोद्भवमात्रे, त्रि । इति व्युत्पत्तिलब्धोऽर्थः ॥)

त्रिदृक्, [श्] पुं, (तिस्रः दृशो नेत्राणि यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

त्रिदोषं, क्ली, (त्रयाणां दोषाणां समाहारः ।) दोषत्रयम् । वातपित्तकफरूपम् । इति राजनिर्घण्टः ॥

त्रिदोषजः, त्रि, (त्रिदोषाज्जायते इति । जन + "पञ्चम्यामजातौ ।" ३ । २ । ९८ । इति डः ।) त्रिदोषजनितः । सन्निपातरोगः । यथा,—
"चिरज्वरे वातकफोल्बणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः ॥"
इति चक्रपाणिदत्तः ॥
("दृष्ट्वा त्रिदोषजं घोरं ज्वरं प्राणापहारकम् ।
तस्मादादौ कफस्यास्य शोषणं परिकीर्त्तितम् ॥
न कुर्य्यात् पित्तशमनं यदीच्छेदात्मनो यशः ।
कफो वातो बलीयांस्तु सद्यो हन्ति ह्यनातुरम् ॥
लङ्घनं वमनं वारि ष्ठीवनं स्यात्त्रिदोषजे ।
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ॥
लङ्घनञ्च समुद्दिष्टं ज्ञात्वा दोषबलाबलम् ।
कफं विशोधितं ज्ञात्वा ततो वातनिवारणम् ॥
पित्तसंशमनं कार्य्यं ज्ञात्वा पित्तस्य कोपनम् ।
शोषणीयौ वातकफौ न तु पित्तं विनाशयेत् ॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

त्रिधा, व्य, (त्रि + "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा ।) त्रिप्रकारः । इति मुग्धबोधम् ॥ यथा, वराहपुराणे ।
"नारायणः परो देवः सत्त्वरूपो जनार्द्दनः ।
त्रिधात्मानं स भगवान् ससर्ज परमेश्वरः ॥"
(यथा, महाभारते । १३ । १४१ । ७८ ।
"धर्म्मार्थैः समाहार्य्यो धर्म्मलब्धं त्रिधा धनम् ।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः ॥")

त्रिधातुः, पुं, (त्रीन् धर्म्मार्थकामान् दधाति पुष्णातीति । धा + तुन् ।) गणेशः । इति त्रिकाण्डशेषः ॥ (त्रयाणां धातूनां समाहारः ।) धातुत्रये, क्ली ॥

त्रिधामा, [न्] पुं, (त्रीणि भूरादीनि सत्त्वादीनि वा धामानि स्थानानि यस्य ।) विष्णुः । (यथा, मुकुन्दमालायाम् । ११ ।
"तृष्णातोये मदनपवनोद्धूतमोहोर्म्मिमाले
दारावर्त्ते सहजतनयग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन् !
पादाम्भोजे वरद ! भवतो भक्तिनावं प्रसीद ॥")
शिवः । अग्निः । मृत्युः । इति शब्दार्थकल्पतरुः ॥ (दशमद्वापरस्य व्यासः । यथा, देवीभागवते । १ । ३ । २८ ।
"सारस्वतस्तु नवमे त्रिधामा दशमे तथा ॥")
धामत्रये, क्ली स्त्री च ॥ (क्ली, स्वर्गः । यथा, भागवते । ३ । २४ । २० ।
"हंसो हंसेन यानेन त्रिधाम परमं ययौ ॥"
"त्रिधाम तृतीयं धाम स्वर्गः तस्य परां काष्ठां सत्यलोकम् ॥" इति तट्टीकायां स्वामी ॥)

त्रिधारकः, पुं, (त्रिस्रो धारा यस्य । ततः स्वार्थे संज्ञायां वा कन् ।) गुण्डतृणम् । इति राजनिर्घण्टः ॥ (त्रयाणां धारकाणां समाहारः ।) धारकत्रये, क्ली ॥

त्रिधारस्नुही, स्त्री, (त्रिषु भागेषु धारा यस्याः । सा एव स्नुही ।) स्नुहीविशेषः । तत्पर्य्यायः । व्यासः २ धारास्नुही ३ । इति राजनिर्घण्टः ॥

त्रिनयनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि नयनानि यस्य । "क्षुभ्नादिषु च ।" ८ । ४ । ३९ । इति निषेधात् न णत्वम् ।) शिवः । इति हलायुधः ॥ (यथा, महाभारते । १४ । ८ । २७ ।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ॥")
नयनत्रये, क्ली ॥ (लोचनत्रयविशिष्टे, त्रि । यथा, मातृकासरस्वतीध्याने ।
"सुशुभ्रोच्चयुग्मं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजे-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये ॥")

त्रिनयना, स्त्री, (त्रीणि नयनानि यस्याः । टाप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"पश्चिमा चोत्तरं लोकं तथा ब्रह्मायनं परम् ।
नयं सक्तार्थधर्म्मत्वं दृष्टौ त्रिनयना मता ॥"

त्रिनेत्रः, पुं, (त्रीणि नेत्राणि यस्य ।) शिवः । यथा, नैषधे । १ । ६ ।
"दिगीशवृन्दांशविभूतिरीशिता
दिशां स कामप्रसरावरोधिनीम् ।
दधार शास्त्राणि दृशं द्वयाधिकां
निजत्रिनेत्रावतरत्वबोधिकाम् ॥"
तस्य गणाः । यथा, मत्स्यपुराणे ।
"ततः साध्यगणानीशस्त्रिनेत्रानसृजत् पुनः ।
कोटयश्चतुराशीतिर्जरामरणवर्जिताः ॥
वामः स्वजन्मनस्तान् ब्रह्मणा विनिवारितः ।
नैवंविधा भवेत् सृष्टिर्ज्जरामरणवर्ज्जिता ॥"

त्रिनेत्रचूड़ामणिः, पुं, (त्रिनेत्रस्य महादेवस्य चूड़ामणिः शिरोभूषणम् ।) चन्द्रः । इति त्रिकाण्डशेषः ॥